International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 268-271
© 2020 IJSR
www.anantaajournal.com
Received: 04-01-2020
Accepted: 07-02-2020

**Kshipra Joshi**
Assistant Professor,
Department of Sanskrit, MVSC (Udaipur), JRNRV (Deemed to-be-University) Udaipur, Rajasthan, India

**Corresponding Author:**
**Kshipra Joshi**
Assistant Professor,
Department of Sanskrit, MVSC (Udaipur), JRNRV (Deemed to-be-University) Udaipur, Rajasthan, India

# साहित्ये दर्शनम : कालिदासः शंकुतलम

## Kshipra Joshi

**सार:**

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री, ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् । यां आहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥१॥

(नान्द्यन्ते)

सूत्रधारः -- (नेपथ्याभिमुखमवलोक्य)
आर्ये यदि नेपथ्यविधानमवसि अमितस्तावदागम्यताम् ।

(प्रविश्य)

नटी - आर्यपुत्र इयमस्मि ।

सूत्रधारः -- आर्य अभिरूपभूयिष्ठा परिषदियम् । अद्य खलु कालिदासग्रथितवस्तुना नवेनाभिज्ञानशकुंतलाख्येन नाटकेनोपस्थातव्यमस्माभिः । तत्प्रतिपात्रमाधीयतां यत्नः।

नटी -- सुविहितप्रयोगतयायार्यस्य न किमपि परिहास्यते ।

सूत्रधारः -- आर्ये कथयामि ते भूतार्थम् । आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् । बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥२॥

नटी -- आर्य एवमेतत् । अनन्तरकरणीयमार्य आज्ञापयतु ।

सूत्रधारः -- किमन्यदस्याः परिषदः श्रुतिप्रसादनतः । तदिममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम् ।

सम्प्रति हि - सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः । प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः॥३॥

नटी -- तथा । (इति गायति) ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि ।
अवतंसयन्ति दममानाः प्रमदाः शिरीषकुसुमानि॥४॥

सूत्रधारः -- आर्य साधु गीतम् । अहो रागबद्धचित्तवृत्तिरालिखित इव सर्वतो रङ्गः ।
तदिदानीं कतमत्प्रकरणमाश्रित्यैनमाराधयामः ।

नटी -- नन्वार्यमिश्रैः प्रथममेवाज्ञप्तमभिज्ञानशकुंतलं नामापूर्वं नाटकं प्रयोगे अधिक्रियतामिति ।

सूत्रधारः -- आर्ये सम्यगनुबोधितोऽस्मि । अस्मिन्क्षणे विस्मृतं खलु मया तत् । कुतः ।
तवास्मि गीतरागेण हारिणा प्रसभं हृतः । एष राजेव दुष्यन्तः सारङ्गेणतिरंहसा॥५॥

(इति निष्क्रान्तौ)

**प्रस्तावना**

ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च

सूतः -- (राजानं मृगं चावलोक्य) आयुष्मन् । कृष्णसारे ददश्चक्षुस्त्वयि चाधिज्यकार्मुके । मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम्॥६॥

राजाः -- सूत दूरममुना सारङ्गेण वयमाकृष्टाः । अयं पुनरिदानीमपि ग्रीवाभङ्गभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् । दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्याम् प्रयाति॥७॥
तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः ।

सूतः -- आयुष्मन् उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः । तेन मृग एष विप्रकृष्टान्तरः संवृत्तः । सम्प्रति समदेशवर्तिनस्ते न दुरासदो भविष्यति।

राजाः -- तेन हि मुच्यन्तामभीषवः ।

सूतः -- यदाज्ञापयत्यायुष्मान् । (रथवेगं निरूप्य) आयुष्मन्पश्य पश्य । मुक्तेषु रश्मिषु निरायतपूर्वकाया निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः । आत्मौद्धतैरपि रजोभिरलङ्घनीया धावन्त्यमी मृगजवाक्षमयेव रथ्याः॥८॥

राजाः -- सत्यम् । अतीत्य हरितो हरींश्च वर्तन्ते वाजिनः । तथा हि ।

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां यदर्धे विछिन्नं भवति कृतसंधानमिव तत् । प्रकृत्या यद्वक्त्रं तदपि समरेखं नयनयोर्न मे दूरे किञ्चित्क्षणमपि न पार्श्वे रथज्जवात्॥९॥

सूत पश्यैनं व्यापद्यमानम् । (इति शरसंधानं नाटयति) (नेपथ्ये) भो भो राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

सूतः -- (आकर्ण्यावलोक्य च)

आयुष्मनस्य खलु ते बाणपातवर्तिनः कृष्टसारस्यान्तरे तपस्विन उपस्थिताः ।

राजाः -- (ससम्भ्रमम्) तेन हि प्रगृह्यन्तां वाजिनः ।

सूतः -- तथा । (इति रथं स्थापयति) (ततः प्रविशत्यात्मनातृतीयो वैखानसः)

वैखानसः -- (हस्तमुद्यम्य) राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः । न खलु न खलु बाणः संनिपात्योऽयमस्मिन्मृदुनि मृगशरीरे पुष्पराशाविवाग्निः । क्व बत हरिणकानां जीवितं चातिलोलं क्व च निशितनिपाता वज्रसाराः शरास्ते॥१०॥

तत्साधुकृतसंधानं प्रतिसंहर सायकम् । आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि॥११॥

राजाः -- एष प्रतिसम्हृतः । (इति यथोक्तं करोति)

वैखानसः -- सदृशमेतत् पुरुवंशप्रदीपस्य भवतः । जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव । पुत्रमेवङ्गुणोपेतं चक्रवर्तिनमाप्नुहि॥१२॥

इतरौ -- (बाहू उद्यम्य) सर्वथा चक्रवर्तिनं पुत्रमाप्नुहि ।

राजाः -- (सप्रणामम्) प्रतिगृहीतं ब्राह्मणवचनम् ।

वैखानसः -- राजन् समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यकार्यातिपातः प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः । अपि च । रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य । ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति॥१३॥

राजाः -- अपि संनिहितोऽत्र कुलपतिः ।

वैखानसः -- इदानीमेव दुहितरं शकुंतलामतिथिसत्काराय नियुज्य दैवं अस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः ।

राजाः -- भवतु । तामेव पश्यामि । सा खलु विदितभक्तिं मां महर्षेः करिष्यति ।

वैखानसः -- साधयामस्तावत् । (इति सशिष्यो निष्क्रान्तः)

राजाः -- सूत चोदयाश्वान् पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहे ।

सूतः -- यदाज्ञापयत्यायुष्मन् । (इति भूयो रथवेगं निरूपयति)

राजाः -- (समन्तादवलोक्य) सूत अकथितोऽपि ज्ञायत एव यथायमाश्रमाभोगस्तपोवनस्येति ।

सूतः -- कथमिव ।

राजाः -- किं न पश्यति भवान् । इह हि नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः

प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः । विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगास्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः॥१४॥

<कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूला

<भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन ।

<एते चार्वागुपवनभुवि च्छिन्नदर्भान्कुरायां

<नष्टांशका हरिणशिशवो मन्दमन्दं चरन्ति ।

सूतः -- सर्वमुपपन्नम् ।

राजाः -- (स्तोकमन्तरं गत्वा)

तपोवननिवासिनामुपरोधो मा भूत् । एतावत्येव रथं स्थापय यावदवतरामि ।

सूतः -- धृताः प्रग्रहाः । अवतरत्वायुष्मान् ।

राजाः -- (अवतीर्य)

सूत विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावद्गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीयार्पयति) सूत यावदाश्रमवासिनः प्रत्यवेक्ष्याहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः ।

सूतः -- तथा ।

(इति निष्क्रान्तः)

राजाः -- (परिक्रम्यावलोक्य च) इदमाश्रमद्वारम् । यावत्प्रविशामि । (प्रविश्य । निमित्तं सूचयन्) शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहस्य । अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥१५॥

(नेपथ्ये) इत इतः सख्यौ ।

राजाः -- (कर्णं दत्त्वा) अये दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते । यावदत्र गच्छामि ।

(परिक्रम्यावलोक्य च)

अये एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुइत एवाभिवर्तन्ते ।

(निपुणं निरूप्य)

अहो मधुरमासां दर्शनम् । शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य । दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥१६॥

यावदिमां छायामाश्रित्य प्रतिपालयामि । (इति विलोकयन् स्थितः) (ततः प्रविश्यति यथोक्तव्यापारा सह सखीभ्यां शकुंतल)

शकुंतला -- इत इतः सख्यौ ।

अनसूया -- हला शकुन्तले त्वत्तोऽपि तातकाश्यपस्याश्रमवृक्षकाः प्रियतरा इति तर्कयामि । येन नवमालिकाकुसुमपेलवापि त्वमेतेषामालवालपूरणे नियुक्ता ।

शकुंतला -- न केवलं तातनियोग एव । अस्ति मे सोदरस्नेहोऽप्येतेषु । (इति वृक्षसेचनं रूपयति)

राजाः -- कथमियं सा कण्वदुहिता । असाधुदर्शी खलु तत्रभवान्काश्यपो य इमामाश्रमधर्मे नियुङ्क्ते ।

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति । ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेतुमृषिर्व्यवस्यति॥ १७॥

भवतु । पादपान्तर्हित एव विश्रब्धं तावदेनां पश्यामि । (इति तथा करोति)

शकुंतला -- सखि अनसूये अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रिताऽस्मि । शिथिलय तावदेतत् ।

अनसूया -- तथा ।

(इति शिथिलयति)

प्रियंवदा -- (सहासम्)

अत्र पयोधरविस्तारयितृ आत्मनो यौवनं उपालभस्व । मां किं उपालभसे ।

राजाः -- काममननुरूपमस्य वपुषो वल्कलं न पुनरलंकारश्रियं न पुष्यति । कुतः । सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति । इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥१८॥

शकुंतला -- (अग्रतोऽवलोक्य) एष वातीरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः । यावदेनं सम्भावयामि । (इति परिक्रामति)

प्रियंवदा -- हला शकुन्तले अत्रैव तावन्मुहूर्तं तिष्ठ यावत्त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति ।

शकुंतला -- अतः खलु प्रियंवदासि त्वम् ।

राजाः -- प्रियमपि तथ्यमाह शकुंतलां प्रियंवदा । अस्याः खलु अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू । कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम्॥१९॥

अनसूया -- हला शकुन्तले इयं स्वयम्वरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका । एनां विस्मृताऽसि ।

शकुंतला -- तदात्मानमपि विस्मरिष्यामि । (लतामुपेत्यावलोक्य च) हला रमणीये खलु काल एतस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः । नवकुसुमयौवना वनज्योत्स्ना स्निग्धपल्लवतयोपभोगक्षमः सहकारः ।

प्रियंवदा -- अनसूये जानासि किं शकुंतला वनज्योत्स्नामतिमात्रं पश्यतीति ।

अनसूया -- न खलु विभावयामि । कथय ।

प्रियंवदा -- यथा वनज्योत्स्नानुरूपेण पादपेन संगता अपि नामैवमहमप्यात्मनोनुरूपं वरं लभेयेति ।

शकुंतला -- एष नूनं तवात्मगतो मनोरथः । (इति कलशमावर्जयति)

राजाः -- अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात् । अथवा कृतं संदेहेन । असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः । सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरण प्रवृत्तयः॥२०॥
तथापि तत्त्वत एनामुपलस्ये ।

शकुंतला -- (ससम्भ्रमम्)
अम्भो । सलिलसेकसम्भ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोभिवर्तते । (इति भ्रमरबाधां रूपयति)

राजाः -- (सस्पृहम्) चलपाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः । करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरम् वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती॥२१॥

शकुंतला -- न एष धृष्टो विरमति । अन्यतो गमिष्यामि । कथमितोऽप्यागच्छति । हला परित्रायेथां मामनेन दुर्विनीतेन मधुकरेणाभिभूयमानाम् ।

उभे -- (सस्मितम्) के आवां परित्रातुम् । दुष्यंतमाक्रन्द । राजरक्षितव्यानि तपोवनानि नाम ।

राजाः -- अवसरोऽयमात्मानं प्रकाशयितुम् । न भेतव्यं न भेतव्यम् -। (इत्यर्धोक्ते स्वगतम्)
राजभावस्त्वभिज्ञातो भवेत् । भवतु एवं तावदभिधास्ये ।

शकुंतला -- (पदान्तरे स्थित्वा । सदृष्टिक्षेपम्) कथमितोऽपि मामनुसरति ।

राजाः -- (सत्वरमुपसृत्य) आः कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु॥२२॥
(सर्वा राजानं दृष्टा किंचिदिव सम्भ्रान्ताः)

अनसूया -- आर्य न खलु किमप्यत्याहितम् । इयं नौ प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता । (इति शकुंतलां दर्शयति)

राजाः -- (शकुंतलाभिमुखो भूत्वा)
अपि तपो वर्धते । (शकुंतला साध्वसादवचना तिष्ठति)

अनसूया -- इदानीमतिथिविशेषलाभेन । हला शकुन्तले गच्छोटजम् । फलमिश्रमर्घमुपहर । इदं पादोदकं भविष्यति।

राजाः -- भवतीनां सूनृतयैव गिराकृतमातिथ्यम् ।

प्रियंवदा -- तेन ह्यस्यां प्रछायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः ।

राजाः -- नूनं यूयमप्यनेन कर्मणा परिश्रान्ताः ।

अनसूया -- हला शकुन्तले उचितं नः पर्युपासनमतिथीनाम् । अत्रोपविशामः । (इति सर्वा उपविशन्ति)

शकुंतला -- (आत्मगतम्) किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता ।

राजाः -- (सर्वा विलोक्य) अहो समवयोरूपरमणीयं भवतीनां सौहार्दम् ।

प्रियंवदा -- (जनान्तिकम्) अनसूये को नु खल्वेष चतुरगम्भीराकृतिर्मधुरं प्रियमालपन्प्रभाववानिव लक्ष्यते ।

अनसूया -- सखि ममाप्यस्ति कौतूहलम् । पृच्छामि तावदेनम् । (प्रकाशम्) आर्यस्य मधुरालापजनितो विश्रम्भो मां मन्त्रयते कतम आर्येण राजर्षिवंशोऽलंक्रियते कतमो वा विरहपर्युत्सुकजनः कुतो देशः किन्निमित्तं वा सुकुमारतरोऽपि तपोवनगमनपरिश्रमस्यात्मा पदमुपनीतः ।

शकुंतला -- (आत्मगतम्) हृदय मोत्ताम्य । एषा त्वया चिन्तितान्यनसूया मन्त्रयते ।

राजाः -- (आत्मगतम्) कथमिदानीं आत्मानं निवेदयामि कथं वात्मापहारं करोमि । भवतु । एवं तावदेनां वक्ष्ये । (प्रकाशम्) भवति यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोहमविघ्नक्रियौपलम्भाय धर्मारण्यमिदं आयातः । (शकुंतला शृङ्गारलज्जां रूपयति)

अनसूया -- (उभयोराकारं विदित्वा । जनान्तिकम्) हला शकुन्तले यद्यत्राद्य तातः संनिहितो भवेत् ।

शकुंतला -- ततः किं भवेत् । सख्यौ -- इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति ।

शकुंतला -- युवामपेतम् । किमपि हृदये कृत्वा मत्रयेथे । न युवयोर्वचनं श्रोष्यामि ।

राजाः -- वयमपि तावद्भवत्योः सखीगतं किमपि पृच्छामः ।

सख्यौ -- आर्य अनुग्रह इवेयमभ्यर्थना ।

राजाः -- भगवान्काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । इयं च वः सखी तदात्मजेति कथमेतत् ।

अनसूया -- शृणोत्वार्यः । अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः ।

राजाः -- अस्ति । श्रूयते ।

अनसूया -- तमावयोः प्रियसख्याः प्रभवमवगच्छ । उज्झितायाः शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता ।

राजाः -- उज्झितशब्देन जनितं मे कौतूहलम् । आमूलाच्छ्होतुमिच्छामि ।

अनसूया -- शृणोत्व् आर्यः । गौतमीतीरे पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी ।

राजाः -- अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् ।

अनसूया -- ततो वसंतोदारसमये तस्या उन्मादयितृ रूपं प्रेक्ष्य -(इत्यर्धोक्ते लज्जया विरमति)

राजाः -- परस्ताज्ज्ञायत एव । सर्वथाप्सरःसम्भवैषा ।

अनसूया -- अथ किम् ।

राजाः -- उपपद्यते । मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः । न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥२३॥

**सन्दर्भः**

1. अभिज्ञान शाकुंतलं में काव्य सौंदर्य
2. अभिज्ञान शाकुंतलम्